त्यर्थाल्लभ्यते, सर्वं "वाक्यं सावधारणं भवतीति" न्यायात् उच्यते। क्रयनक्षत्रे क्रयः कार्य्य इत्युक्तेः विक्रयस्य स्वतन्त्र कर्मत्वात् तत्र क्रयर्क्षे निषेधाभावः एवं विक्रयर्क्षेष्वपि क्रयनिषेधाभावः तत्र निषेधे सत्यन्यनक्षत्राणां मध्यम-त्वावगतेः कदाचित् क्रयनक्षत्राणां मध्यमत्वमङ्गीकृत्य विक्रयस्य विहितमुहूर्त्तानुपलब्धौ तत्र मुहूर्त्तो मध्यमोऽपि-ग्राह्यस्तदर्थमपि वाचनिकस्तन्निषेधः अतः। क्रयविक्रयन क्षत्रेभ्योभिन्ननक्षत्रेषु क्रयविक्रयौ मध्यमावित्यनुमिमः निषेधस्य वाचनिकत्वमुक्तं दीपिकायाम् "यमादृशक्रा-दिक्षुताशपूर्वा नेष्टाः क्रये विक्रयणेऽतिशस्ताः। पौष्णाऽश्वि-चित्राम्बुपवातकर्णाः शस्ताः क्रये विक्रयणे निषिद्धाः" इति अथ क्रयमुहूर्त्त उच्यते। तत्र पौष्णं रेवती अम्बुपः शत-तारका अश्विनी वातः स्वाती श्रवणः चित्रा एतानि भानि-क्रये शुभानि विक्रये निषिद्धानि च सम्मतिरत्रोक्तैव"।

**क्रयण** न० क्री—भावे ल्युट्। क्रये "वैश्यराजन्ययोः सोमे न्यग्रोधस्तिभीनुपनह्योच्छन् भक्षाय क्रयणप्रभृत्यनुसोमम्" कात्या०श्रौ०१०,९,३०, क्रयणप्रभृति (सोम) क्रयणादा रभ्य" कर्कः। क्रयणस्येदम् छ। क्रयणीय क्रयणसम्बन्धि-दिने। "अपस्वव्यभस्मावापनं क्रयणीयादौ" कात्या० श्रौ० १६,६,२२, आदौ क्रयणीयस्याङ्गः" सं० व्या०।

**क्रयनियम** पु० क्रये नियमः। क्रेतृविक्रेत्रोर्नियमभेदे। स च नियमः "भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्। स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्रवाणम्" ऋ०४,२४,९, भाष्ये दर्शितो यथा— "अत्र ऋग्द्वये संप्रदायविद्भिः पूर्वाचार्य्यैः केचित् श्लोकाः पठ्यन्ते तएव लिख्यन्ते। "अल्पं यः प्रतिगृह्णाति मूल्यं पण्येन भूयसा। स क्रेतारं पुनर्गच्छन्नविक्रीतस्त्वयं मया। इति ब्रुवन् कामयते पुनर्मूल्यस्य पूरणम्। स वि-क्रेता पुनर्मूल्यं भूयसा न प्रपूरयेत्। हीनं न लभते वस्नं यदा विक्रीतवान् पुरा। यथासमयमेव स्यात्तयोर्न पुनरन्यथा। अयं विक्रय एवेति समयश्चेत् कृतोभवेत्। अथ मन्त्रार्थमेतत् स्वाद्विचार्यैव तु निर्णयः। इत्येवं समयो ऽकारि तदा मूल्यं प्रपूर्यते। तस्मादादौ मया कार्य्यः स-मयोऽत्रेति चिन्तयन्। वामदेवो वशीकृत्य शक्रं स्तोत्रेण भूयसा। विक्रीणन् समभं चक्रइन्द्रं क इमभित्यृचा। अतश्च ह्यृच एकार्थौ भूयसा वस्नमित्ययमिति"। अय-मर्थः प्रतिपाद्यते कश्चित् भूयसा भूम्ना पण्येन द्रव्येण कनीयोऽल्पतरं वस्नं वसु मूल्यं धनमचरत् प्राप्नोति पु-नर्यन् क्रेतारं पुनर्गच्छन् स विक्रेतायमर्थो मया न विक्रीत इति ब्रुवन् न कानिषं मूल्यपूर्त्तिं कामयते व्यत्ययेनोत्तम पुरुषः। स विक्रेता भूयसा धनेन कनीयोऽल्पतरं मूल्यं नारिरेचीत् क्रेतुः सकाशान्न रिक्तीकरोति न लभत इत्यर्थः। दीना असमर्था दक्षाः समर्थाश्च वाणं वचनं विप्रदुहन्ति यथोक्तं क्रयकाले तथैव लभन्ते"

"क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः यदा वृत्राणि जंघनदथैनं मे पुनर्ददत्" ऋ० ४,२४,१०,

"मम मदीयमिदं स्वभूतमिन्द्रं धेनुभिः प्रीणयित्रीभिर्दश-भिर्दशसंख्याकाभिः स्तुतिभिः कः क्रीणाति क्रयं करोति हे तदानीं क्रेतारो युष्माकं मध्य एवमपि समयः क्रियते यदा-ऽयमिन्द्रो वृत्राणि त्वदीयान् शत्रून् जंघनत् हन्यात् अथा-नन्तरमेवैनमिन्द्रं मे मह्यं पुनर्ददत् पुनर्दद्यात्" भा०।

"निश्चित्य वस्तु तन्मूल्यमुभयोः सम्मतौ शिवे!। पर-स्पराज्ञाकरणं क्रयसिद्धिस्ततो भवेदिति"। "क्रयसिद्धिर-दुष्टानां गुणश्रवणतो भवेत्। विपर्यये तद्गुणानामन्यथा भवति क्रयः" महा० नि० त०

**क्रयलेख्य** न० ६त०। "गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरा-न्वितम्। पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते" वृह-स्पत्युक्तलक्षणे क्रयसूचकपत्रे (कवाला)।

**क्रयविक्रय** पु०द्वि०व०। द्वन्द्वः १क्रये विक्रये च। "आगमं निर्ग-मस्थानं तथा वृद्धिक्षयावुभौ। विचार्य्य सर्वपण्यानां का-रयेत् क्रयविक्रयौ। पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते। कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः" मनुः। "आगमनियमोपयोगादेः पण्यानामनियतत्वात् अस्थिरा-र्घाणां पञ्चरात्रे पञ्चरात्रे गते, स्थिरतरार्घाणां पक्षे पक्षे गते वणिजामर्घविदां प्रत्यक्षं नृपतिराप्तपुरुषेण व्यवस्थां (मूल्यस्य) कुर्य्यात्" कुल्लू०। "क्रयविक्रयानुशयस्य विवादः स्वामिपालयोः" मनुः। क्रयसहितो विक्रयः शा० त०। २क्रयसहितविक्रये। "देवदानवगन्धर्वयक्षराक्षसपन्नगाः। नासन् कृतयुगे तात! तदा न क्रयविक्रयः" भा० व० १४९अ०। ३तद्युक्ते वाणिज्ये "ऋणदानं तथाऽऽदानं वस्तूनां क्रयविक्रयम्। न कुर्य्याद्गुरुणा सार्द्धं शि-ष्योभूत्वा कथञ्चन" तन्त्रसा०।

**क्रयविक्रयानुशय** पु० क्रये विक्रये चानुशयः पश्चात्तापः। मनूक्ते अष्टादशविवादान्तर्गते विवादभेदे। स च द्विविधः क्रीतानुशयो विक्रीतानुशयश्च। अनुशयशब्दे १८६पृष्ठे त० द्वितिः दृश्या। अधिकं क्रीतानुशयशब्दे वक्ष्यते।